Semester -II, CC-3, Section-C, Important Prose romances and fables-

Hitopadesha

हितोपदेशः

संस्कृतसाहित्यस्य समृद्धासु शाखासु कथासाहित्यम् भवति अन्यतमम्। भारतवर्षे प्रायेण सर्वेषां मनुष्याणां कथाश्रवणे या प्रवृत्तिः दृश्यते तस्याः एव कथासाहित्यस्य आविर्भावः इति वक्तुं शक्यते। तस्मात् कथानाम् उल्लेखः वेदेषु, पुराणेषु, रामायणे, महाभारते तथा काव्येषु नाटकेषु च दृश्यते। परन्तु उपस्थापनस्य वैचित्र्यवशात् एका अपि कथा वैचित्र्यम् उपादेयत्वं च प्राप्नोति। कथाश्रवणेन मानवां चित्तेषु कश्चित् आनन्दः जायते। न केवलम् एतदेव, अपि तु कथासाहित्येन नीतिशिक्षा अपि प्राप्यते। वेदादिग्रन्थेभ्यः या नीतिशिक्षा लभ्यते सा शिक्षा सर्वदा न तु सुखग्राह्या भवति, विशेषतः बालकानां कृते। परन्तु कथासाहित्येभ्यः या शिक्षा लभ्यते तां शिक्षां तु सर्वे एव सादरं गृह्णति इति कथासाहित्यस्य वैशिष्ट्यम्। संस्कृतसाहित्येषु साहित्यरूपेण याः कथाः प्राप्यन्ते तेषु हितोपदेशः इति कथासाहित्यम् संस्कृतगद्यसाहित्यस्य ऐतिह्यम् तथा अयं ग्रन्थोऽपि भवति पञ्चतन्त्रादिवत् कश्चन माहात्म्यमण्डितो ग्रन्थः।

ग्रन्थस्य आरम्भे एव नारायणशर्मणा अङ्गीकृतम् यत्, तस्य रचनायाः उत्सस्थानम् खलु पञ्चतन्त्रम्। परन्तु अन्यस्मात् एकस्मात् ग्रन्थादपि तेन कथावस्तु गृहीतम् इ त्यपि तेन स्वीकृतम्। तदुक्तम् तेन - "पञ्चतन्त्रात्तथान्यस्माद् ग्रन्थादाकृष्य लिख्यते" इति। विदुषां मतानुसारम् अपरः ग्रन्थो भवति 'कामन्दकीयः नीतिसारः' इति। नारायणशर्मा आरीत् कश्चित् वङ्गदेशनिवासी,

राजा धवलचन्द्रः आसीत् तस्य पृष्ठपोषकः। सोऽपि राजा आसीत् गुणग्राही। अस्मिन् प्रसङ्गे स्वयं कविना लिखितम् –

“श्रीमान् धवलचन्द्रोऽसौ जीयान्माण्डलिको रिपून्।

येनायं संग्रहो यत्नाल्लेखयित्वा प्रचारितः।।” इति।

हितोपदेशे साकल्येन ४३ कथाः प्राप्यन्ते। तासु कथासु पुनः २५कथाः पञ्चतन्त्रात् एव संगृहीताः। पाटलिपुत्रस्य नृपतेः सुदर्शनस्य पुत्रेभ्यः शिक्षादानार्थम् एव अयं कथाग्रन्थः विरचितः। राजा धवलचन्द्रः आसीत् १३७३ ख्रीष्टाब्दस्य पूर्ववर्ती। तस्मात् ततः प्राक् एव अयं ग्रन्थः विरचितः अभवत् इति केचन कथयन्ति। अध्यापकप्रवरेण उइन्टारनिज्-महोदयेन हितोपदेशे भट्टारकवारः इति शब्दस्य प्रयोगं प्रत्यक्षीकृतवान्। तत्प्राप्य तेन एवं मतं प्रसूतम् यत् ५०० ख्रीष्टाब्दस्य पूर्ववर्तिनि कस्मिन्चित् भारतीयशिलालेखे अस्य शब्दस्य उल्लेखो नास्ति। परन्तु ईशवीयनवमशतकात् परमेव अयं शब्दः आधिक्येन प्रचलितः आसीत्। तस्मात् नवमशतकात् अनन्तरम् चतुर्दशशतकस्य अन्तिमार्धस्य मध्यवर्तिनि कस्मिंश्चित् समये नारायणः शर्मा आविर्भूतः अभवत् इति विदुषां मतम्।

हितोपदेशे चत्वारः अध्यायाः सन्ति। मित्रलाभः, सुहृद्भेदः, विग्रहः सन्धिश्च। यद्यपि ग्रन्थेऽस्मिन् पञ्चतन्त्रस्य प्रभावः परिलक्ष्यते तथापि वृत्तोपन्यासस्य दाक्ष्यं खलु लेखकस्य स्वकीयम्। पञ्चतन्त्रात् गृहीतानाम् कथानाम् मध्ये क्रमः न अनुसृतः। कथानाम् तथ्यपरम्परायाम् अपि वैचित्र्यम् दृश्यते। कामन्दकीयनीतिसारात् अत्र नैके श्लोकाः गृहीताः। मुनिमूषिक-कथा,

वीरवरस्य उपाख्यानम्, ब्राह्मणस्य बुद्धिमान्द्यात् नकुलस्य मृत्युः, सुन्द-उपसुन्दयोः वृत्तम्, नीलवर्णस्य शृगालस्य वृत्तम् चेति कथाः अत्यन्तम् मनोज्ञरूपेण ग्रन्थेऽस्मिन् परिवेशिताः। कथाग्रन्थस्य अस्य भाषायाः सारल्यम् अनायासेन एव हृदयस्पर्शि भवति। चरितानां नामकरणेऽपि कथाकारस्य नैपुण्यम् परिलक्ष्यते। तथाहि – दुर्दान्तः महाविक्रमश्चेति कश्चित् सिंहः, महातपा इति कश्चित् मुनिः, सुदर्शनः इति कश्चन नृपतिः, दीर्घमुखः इति एकः वकः, फुल्लोत्पलम् इति एकं सरः। प्रायेण सर्वाणि एव नामानि पञ्चतन्त्रात् गृहीतानि, तथापि सः यथार्थतया कथाशिल्पी आसीत् इति निश्चप्रचम् वक्तुं शक्यते। कथाच्छलेन नीतिशिक्षादानेऽपि स आसीत् कृतकृत्यः कथाकविः। तस्मात् उच्यते - 'कथाच्छलेन बालानां नीतिस्तदिह कथ्यते' इति शम्।